Bal Bharati PUBLIC SCHOOL
DWARKA

# संस्कृत-लतिका

Volume - 6 May 2020

## उपप्रधानाचार्यायाः सन्देशः .......



प्रियाः अभिवावकाः छात्राः च.......

**उत्साहो बलवानार्य नास्त्युत्साहात्परं बलम् ।**
**सोत्साहस्य लोकेषु न किञ्चिदपि दुर्लभम् ॥**

रामायणस्य श्लोकोऽयं अस्मान् शिक्षयति यत् उत्साहो बलवत्तमः भवति येन उत्साहिनः जनाः महतो संकटात् अपि प्रमुच्यन्ते। वर्तमानसमये वयं प्रतिकूलावस्थासु वर्तामहे। भारतं नैव अपितु समग्रं विश्वमेव संकटापन्नं वर्तते इदानीं समये ,तदपि वयं धैर्यं धारयेम। दुर्वहपरिस्थितौ अपि अहोरात्रं श्रमनिरताय प्रशासनाय, चिकित्सकेभ्यः,स्वच्छताकर्मिभ्यः,आरक्षिभ्यः सामाजिक-संस्थाभ्यः च अस्माभिः आभारः प्रकटितव्यः। प्रतिकूल-परिस्थितौ अपि छात्राणाम् अध्ययनमनवरतं प्रचलेत् इति कर्तव्यभावं मनसि निधाय "बाल-भारती-पब्लिक-स्कूल" इत्यस्य अध्यापकाः अध्यापिकाः च महत् परिश्रमेण स्वीयानि कर्तव्यानि निर्वहन्ति । श्लाघ्याः तेषां प्रयासाः अतः वयमपि तान् प्रति कार्तज्ञं प्रकटयेम। अस्माकीनाः निकटस्थाः नैके जनाः वर्तन्ते येषां कृते परिस्थितयः नानुकूलाः अतः तेषां हितचिन्तनम् अपि अस्माकं परमं कर्तव्यम्। अन्ते ईश्वरं प्रार्थये यत् अस्माकं जनजीवनं त्वरमेव सामान्यंभवेत् । भवन्तः स्वस्थाः प्रसन्नचित्ताः च भवेयुः इत्यपि कामये। - उपप्रधानाचार्या

श्रीमती संध्या कक्कड़

**कोविडनवदशतः सुरक्षायै करणीयोपायाः**

- ⇒ पुनः - पुनः हस्तप्रक्षालनम् ।
- ⇒ मुखाच्छादकस्य प्रयोगः ।
- ⇒ शारीरिक-दूरतायाः पालनम् ।
- ⇒ स्वच्छतानुपालनम् ।
- ⇒ प्रतिनित्यं व्यायामस्य योगस्य च आचारणम् ।
- ⇒ सन्तुलिताहारस्य सेवनम्



विजानन्त्येव भवन्तः यत् सम्पूर्णमपि विश्वं कोविडनवदश इत्यस्य आतङ्कादातङ्कितं वर्तते। अस्माकं भारतमपि अनेन प्रभावितं वर्तते। अतः इदानीं अस्माकमेकमेव कर्तव्यमस्ति यत् धैर्यधारणं कृत्वा वयमस्मात् भीषणसङ्कटात् बहिरागच्छेम । शारीरिकदूरता एव अस्य रोगस्य परमौषधिः वर्तते अतः वयं तथैव आचरेम । बहिर्मा गच्छन्तु, स्वास्थ्यवर्धकानि खाद्यानि खादेयुः। नित्यमेव ज्ञानवर्धकानि नवीनानि पुस्तकानि पठित्वा समयस्य सदुपयोगं कुर्युः। सेवाकार्यरतान् सर्वानपि कोविडनवदशयोद्धन् प्रति वयं कृतज्ञतां प्रकटयेम। बाल भारती पब्लिक स्कूल इत्यस्याध्यापकाः अध्यापिकाः च शिक्षणकार्यमनवरतं प्रवर्तयितुं अस्मिन् कठिनेऽपि समये श्रमनिरताः सन्ति अतः तेऽपि धन्यवादार्हाः। समेऽपि जनाः स्वस्थाः भवेयुः इति मे कामना।

"सर्वे भवन्तु सुखिनः ,सर्वे सन्तु निरामयाः" - नरेन्द्रसेमवालः

संस्कृताध्यापकः (टी.जी.टी)

Volume - 6



# संस्कृत

## पुरः-पुरः प्रगच्छ रे

पुरः पुरः प्रगच्छ रे
प्रगाय मातृवन्दनम्।
स्व-जन्म-भूमि रक्षणे
प्रयच्छ वीर जीवनम्।
शिरः कुरु समुन्नतम्,
तवास्तु मा क्वचिद् भयम्।
पुरः पुरः प्रगच्छ रे
प्रगाय मातृवन्दनम्।
रणेधृतिः सकौशलंम् ,
प्रवर्धताम् मनोबलम् ।
सुनिश्चितः जयस्तव ,
कुरु स्वधर्मपालनम्।
पुरः पुरः प्रगच्छ रे
प्रगाय मातृवन्दनम्।

-साहिल झा (अष्टमी-ब)

## कोविडनवदशतः सुरक्षायैः छात्राणां संदेशः........













## मेलक-दृश्यम्

बाला चलन्ति मेलकम् ।
पश्यन्ति वायु नुलकम् ।।
खादन्ति तत्र मोदकम् ।
पिबन्ति जलम् शीतलम्।।
बाला चलन्ति मेलकम् ।
तिष्ठन्ति ते हिन्डोलकम्।।
गायन्ति तत्र गीतं।
खेलन्ति ते परस्परं।।
मेलन्ति मित्र मण्डलं ।
बाला चलन्ति मेलकम्।।

- नायशा गोयल

षष्ठी-अ

## बालकलाकाराः .......




**व्यायामात् लभते स्वास्थ्यं दीर्घायुष्यं बलं सुखं।**
**आरोग्यं परमं भाग्यं स्वास्थ्यं सर्वार्थसाधनम् ॥**

*भावार्थ :  व्यायाम से स्वास्थ्य, लम्बी आयु, बल और सुख की प्राप्ति होती है। निरोगी होना परम भाग्य है और स्वास्थ्य से अन्य सभी कार्य सिद्ध होते हैं ।*

# द्वयोः मित्रयोः मध्ये संवादः .......






- सानिध्यः बरारा (नवमी-द)

## वर्ग प्रहेलिका

अत्र कानि क्रियापदानि सन्ति..??



क्रियापदानि....???



| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| क | अ | प | त | त् | आ | ने | च | ऊ |
| र | क | पृ | ज | क | रि | ष् | या | वः |
| आ | ग | च्छ | ति | ह | न | या | पा | ए |
| ल | व | तु | ष्य | ति | ल | मः | स्या | त् |
| म | अ | त | ट | द्र | क्ष् | या | मि | त |
| प्र | भ | व | ति | ग | य | थ | झ | ख |
| क | व | दे | ज | इ | च्छ | ति | स् | इ |
| ल | त् | त् | प | स | ति | ण | तः | ध |

यथा चित्तं तथा वाचो ।
यथा वाचस्तथा क्रिया।

- Of the good people there is uniformity in mind, speech and action.
- सज्जनों के मन, वाणी और कार्य में (समानता) होती है



## एहि हसामः.....

यदा मम दन्तक्षयः जायते तदैव यथेच्छं पाकं कृत्वा खादसि किल.....



# उत्तराणि वद.......



(क) 'सर्वतः' इत्यत्र का विभक्तिः अस्ति?

(अ) प्रथमा (ब) तृतीया (स) द्वितीया (द) पंचमी

(ख) '50 (पचास)' इत्यस्य संस्कृतम् अस्ति -

(अ) पंचशत् (ब) पञ्चासत् (स) पंचषत् (द) पञ्चाशत्

(ग) "अभिज्ञानशाकुन्तलम्" नामकं संस्कृत-नाटकं कः अरचत् ?

(अ) अश्वघोषः (ब) कालिदासः (स) माघः (द) भारविः

(घ) "Saint james sanskrit school" कुत्र अस्ति।

(अ) लंदने(ब्रिटेन) (ब) अमेरिकायाम् (सभारते (द) ऑस्ट्रेलियायाम्



आवरणसज्जा सम्पादनम्
च
नरेन्द्रसेमवालः
(टी.जी.टी-संस्कृत)

किं भवन्तः जानन्ति.....???

ब्रिटेन देशस्य लंदनप्रान्ते St. James Schools इत्यस्मिन् विद्यालये संस्कृतम् अनिवार्यविषयम् अस्ति।

वेबफलसम्पृक्तिः -

http://www.sanskritatstjames.org.uk/about-us/st-james-schools/